योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०९२

द्विनवतितमः सर्गः ९२

श्रीवसिष्ठ उवाच ।

इत्युक्तवान्स भगवान्मया कमलसंभवः ।

रघूद्वह पुनः पृष्टो वाक्यमाक्षिप्य भूतपः ।। १

त्वयैव भगवन्प्रोक्ताः शापमन्त्रादिशक्तयः ।

अमोघा इति ता एव कथं मोघाः कृताः पुनः ।। २

शापेन मन्त्रवीर्येण मनोबुद्धीन्द्रियाण्यपि ।

सर्वाण्येव विमूढानि दृष्टानि किल जन्तुषु ।। ३

यथैतौ पवनस्पन्दौ यथा स्नेहतिलौ यथा ।

अभिन्नौ तद्वदेवैतौ मनोदेहौ स एव तत् ।। ४

अथ नास्तीह वा देहः केवलं चेतसैव सः ।

मुधानुभूयते स्वप्नमृगतृष्णाद्विचन्द्रवत् ।। ५

एकनाशे द्वयोरेव नाशोऽत्राभ्युपपद्यते ।

अवश्यं भवितुं मनोनाशे देहपरिक्षयः ।। ६

मनः शापादिभिर्दोषैः कथं नाक्रम्यते प्रभो ।

कथमाक्रम्यते वापि ब्रूहि मे परमेश्वर ।। ७

ब्रह्मोवाच ।

न तदस्तिजगत्कोशे शुभकर्मानुपातिना ।

यत्पौरुषेण शुद्धेन न समासाद्यते जनैः ।। ८

आब्रह्म स्थावरान्तं च सर्वदा सर्वजातयः ।

सर्व एव जगत्यस्मिन्द्विशरीराः शरीरिणः ।। ९

एकं मनःशरीरं तु क्षिप्रकारि सदा चलम् ।

अकिंचित्करमन्यत्तु शरीरं मांसनिर्मितम् ।। १०

तत्र मांसमयः कायः सर्वस्यैव च संगतः ।

सर्वैराक्रम्यते शापैस्तथा विद्यादिसंचयैः ।। ११

मूकप्रायो ह्यशक्तोऽसौ दीनः क्षणविनश्वरः ।

पद्मपत्राम्बुचपलो दैवादिविवशस्थितिः ।। १२

मनोनाम द्वितीयोऽयं कायः कायवतामिह ।

स आयत्तोऽपि नायत्तो भूतानां भुवनत्रये ।। १३

पौरुषं स्वमवष्टभ्य धैर्यमालम्ब्य शाश्वतम् ।

यदि तिष्ठत्यगम्योऽसौ दुःखानां तदनिन्दितः ।। १४

यथा यथासौ यतते मनोदेहो हि देहिनाम् ।

तथा तथासौ भवति स्वनिश्चयफलैकभाक् ।। १५

सफलो मांसदेहस्य न कश्चित्पौरुषक्रमः ।

मनोदेहस्य सफलं सर्वमेव स्वचेष्टितम् ।। १६

पवित्रमनुसंधानं चेतः स्मरति सर्वदा ।

निष्फलास्तत्र शापाद्याः शिलायामिव सायकाः ।।१७

पतत्वम्भसि वह्नौ वा कर्दमे वा शरीरकम् ।

मनो यदनुसंधत्ते तदेवाप्नोति तत्क्षणात् ।। १८

पुरुषातिशयः सर्वः सर्वभावोपमर्दने ।

ददात्यविघ्नेन फलं मनो हि मनसो मुने ।। १९

पौरुषेण बलेनान्तश्चित्तं कृत्वा प्रियामयम् ।

कृत्रिमेन्द्रेण दुःखार्तिर्न दृष्टा सा मनागपि ।। २०

पौरुषेण मनः कृत्वा नीरागं विगतज्वरम् ।

माण्डव्येन जिताः क्लेशाः शूलप्रान्तेऽपितिष्ठता ।। २१

अन्धकूपस्थितेनापि मानसैर्यज्ञसंचयैः ।

ऋषिणा दीर्घतपसा संप्राप्तं वैबुधं पदम् ।। २२

इन्दुपुत्रैर्नरैरेव पुरुषाध्यवसायतः ।

ध्यानेन ब्रह्मता प्राप्ता सा मयापि न खण्ड्यते ।। २३

अन्येऽपि सावधाना ये धीराः सुरमहर्षयः ।

चित्तात्स्वमनुसंधानं न त्यजन्ति मनागपि ।। २४

आधयो व्याधयश्चैव शापाः पापदृशस्तथा ।

न खण्डयन्ति तच्चित्तं पद्मघाताः शिलामिव ।। २५

ये चापि खण्डिताः केचिच्छापाद्यैराधिसायकैः ।

स्वविवेकाक्षमं तेषां मनो मन्ये विपौरुषम् ।। २६

न कदाचन संसारे सावधानमना मनाक् ।

स्वप्नेऽपि कश्चिद्दृश्ये वा दोषजालैः खिलीकृतः ।। २७

मनसैव मनस्तस्मात्पौरुषेण पुमानिह ।

स्वकमेव स्वकेनैव योजयेत्पावने पथि ।। २८

प्रतिभातं यदेवास्य यथाभूतं भवत्यलम् ।

क्षणादेव मनः पीनं बालवेतालवन्मुने ।। २९

प्रतिभासस्यानुपदं प्राक्तनीं स्थितिमुज्झति ।

कुलालकर्मानुपदं घटो मृत्पिण्डतामिव ।। ३०

प्रतिभासार्थतामेति क्षणादेव मनो मुने ।

स्पन्दमात्रात्मकं वारि यथा तुङ्गतरङ्गताम् ।। ३१

अनुसंधानमात्रेण सूर्यबिम्बेऽपि यामिनीम् ।

मनः पश्यत्यशुद्धाक्षश्चन्द्रबिम्बे द्वितामिव ।। ३२

यत्पश्यति तदेवाशु फलीभूतमिदं मनः ।

सह हर्षविषादाभ्यां भुङ्क्ते तस्मात्तदेव तत् ।। ३३

प्रतिभानुपदं चेतश्चन्द्रेऽप्यग्निशिखाशतम् ।

दृष्ट्वा दाहमवाप्नोति दग्धं च परितप्यते ।। ३४

प्रतिभानुपदं चेतः क्षारेऽपि हि रसायनम् ।

दृष्ट्वा पीत्वा परां तृप्तिं याति वल्गति नृत्यति ।। ३५

प्रतिभानुपदं चेतो व्योमन्यपि महावनम् ।

दृष्ट्वा लुनाति लूत्वा च पुनरारोपयत्यलम् ।। ३६

इत्थं यदेव परिकल्पयतीन्द्रजालं

क्षिप्रं तदेव परिपश्यति तात चेतः ।

नासज्जगन्न च सदित्यवगम्य नूनं

लूनां दृशं विविधभेदवतीं जहीहि ।। ३७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे मनोमाहात्म्यवर्णनं नाम द्विनवतितमः सर्गः ।। ९२ ।।